तु दारिद्र्यं वेधदोषे हि जायते । छेदादुत्पाटनाद्वापि तथा प्राकारलङ्घनात् । सीमाया द्विगुणत्यागाद् वेधदोषो न जायते” ।

देवगृहरूपप्रासादे विशेषस्तत्र ४२ अ० उक्तो यथा

“मानेन प्रतिमाया वा प्रासादमपरं शृणु । प्रतिमायाः प्रमाणेन कर्त्तव्या पिण्डिका शुभा । गर्भस्तु पिण्डिकार्द्धेन गर्भमानास्तु भित्तयः । भित्तेरायाममानेन उत्सेधन्तु प्रकल्पयेत् । भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद् बुधः । शिखरस्य तु तुर्येण भ्रमणं परिकल्पयेत् । शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम् । अष्टमांशेन गर्भस्य रथकानान्तु निर्गमः । परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् । तत्तृतीयेन वा कुर्य्याद्रथकानान्तु निर्गमम् । वामत्रयं स्थापनीयं रथकत्रितये सदा । शिखरार्थं हि सूत्राणि चत्वारि विनिपातयेत् । शुकनासोर्द्ध्वतः सूत्रं तिर्य्यग्भूतं निपातयेत् । शिखरस्यार्द्धभागस्थं सिंहं तत्र तु कारयेत् । शुकनासां स्थिरीकृत्य मध्यसन्धौ निधापयेत् । तदूर्द्ध्वन्तु भवेद्वेदी सकण्ठा मनसारकम् । स्कन्धभग्नं न कर्त्तव्यं विकरालं तथैव च । ऊर्द्ध्वं च वेदिकामानात् कलसं परिकल्पयेत् । विस्ताराद्द्विगुणं द्वारं कर्त्तव्यं तु सुशोभनम् । उदुम्बरौ तदूर्द्ध्वञ्च न्यसेच्छाखां सुमङ्गलैः । द्वारस्य तु चतुर्थांशे कार्य्यौ चण्डप्रचण्डकौ । विश्वक्सेनवत्सदण्डौ शिखोर्द्ध्वोडुम्बरे श्रियम् । दिग्गजैः स्नाप्यमानान्तां घटैः साब्जां सुरूपिकाम् । प्रासादस्य चतुर्थांशैः प्राकारस्योच्छ्रयो भवेत् । प्रासादात् पादहीनस्तु गोपुरस्योच्छ्रयो भवेत् । पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका । गारुडं मण्डपं चाग्रे एकं भौमादिधाम च । कुर्य्याद्धि प्रतिमायान्तु दिक्षु चाष्टासु चोपरि । पूर्वे वराहं दक्षे च नृसिंहं श्रीधरं जले । उत्तरे तु हयग्रीवमाग्नेय्यां जामदग्न्यकम् । नैरृत्यां रामकं वायौ वामनं वासुदेवकम् । ईशे प्रासादरचना देया वस्वर्क्कादिभिः । द्वारस्य चाष्टमाद्यंशं त्यक्त्वा वेधो न दोषभाक्” ।

वृ०सं० ५७अ० कश्चिद्विशेषोऽत्रोक्तो यथा

“कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च । देवतायतनं कुर्य्याद्यशोधर्म्माभिवृद्धये । इष्टापूर्त्तेन लभ्यन्ते ये लोकास्तान् बुभूषता । देवानामालयः कार्य्यो द्वयमप्यत्र दृश्यते । सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च । स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः । सरःसु नलिनीच्छन्ननिरस्तरविरश्मिषु । हंसांसाक्षिप्तकह्लारवीचीविमलवारिषु । हंसकारण्डवक्रौञ्चचक्रवाकविराविषु । पर्य्यन्तनिचुलच्छायाविश्रान्तजलचारिषु । क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाः । नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः । फुल्लतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः । पुलिनाभ्युन्नता रम्या हंसहासाश्च निम्नगाः । वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु । रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च । भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्म्मणि । ता एव तेषां शस्यन्ते देवतायतनेष्वपि । चतुःषष्टिपदं कार्य्यं देवतायतनं सदा । द्वारं च मध्यमं तत्र समदिक्स्थं प्रशस्यते । यो विस्तारो भवेद्यस्य द्विगुणा तत्समुन्नतिः । उच्छ्रायाद् यस्तृतीयोऽंशस्तेन तुल्या कटिर्भवेत् । विस्तारार्द्धं भवेद्गर्भो भित्तयोऽन्याः समन्ततः । गर्भपादेन विस्तीर्णं द्वारद्विगुणमुच्छ्रितम् । उच्छ्रायात्पादविस्तीर्णा शाखा तद्वदुदुम्बरः । विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् । त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते । अधःशाखाचतुर्भागे प्रतीहारौ निवेशयेत् । शेषं मङ्गल्यविहगैः श्रीवृक्षस्वस्तिकैर्घटैः । मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत् । द्वारमानाष्टभागोना प्रतिमा स्यात्सपिण्डिका । द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पिण्डिका । मेरुमन्दरकैलासविमानच्छन्दनन्दनाः । समुद्गपद्मगरुडनन्दिवर्द्धनकुञ्जराः । गृहराजो वृषो हंसः सर्वतोभद्रको घटः । सिंहो वृत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा । इत्येते विंशतिः प्रोक्ताः प्रासादाः संज्ञया मया । यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः । तत्र षडश्रिर्मेरुर्द्वादशभौमो विचित्रकुहरश्च । द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः । त्रिंशद्धस्तायामो दशभौमो मन्दरः शिखरयुक्तः । कैलासोऽपि शिखरवान् अष्टाविंशोऽष्टभौमश्च । जालगवाक्षकयुक्तो विमानसंज्ञस्त्रिसप्तकायामः । नन्दन इति षड्भौमो द्वात्रिंशः षोडशाण्डयुतः । वृत्तः समुद्गनामा पद्मः पद्माकृतिः शयानष्टौ । शृङ्गेणैकेन भवेदेकैव च भूमिका तस्य । गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः । कार्य्यश्च सप्तभौमो विभूषितोऽण्डैश्च विंशत्या । कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलात् । गृहराजः षोडशकस्त्रिचन्द्रशाला भवेद्वलभी । वृष एकभूमिशृङ्गो द्वादशहस्तः समन्ततो वृत्तः । हंसो हंसाकारो घटोऽष्टहस्तः कलसरूपः । द्वारैर्युतश्चतुर्भिर्बहुशिखरो भ-